*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[10]**

1. असुराणाम् राजा कः आसीत्?

   (A) इन्द्रः (B) वृत्रासुरः (C) ऋत्विजः (D) आचार्यः

   **उत्तर :** (B) वृत्रासुरः

2. कस्य बलम् वर्धयितुम् वृत्रासुरः यज्ञं कारितवान्?

   (A) इन्द्रस्य (B) पुरोहितस्य (C) शिक्षकस्य (D) स्वस्य

   **उत्तर :** (D) स्वस्य

3. यज्ञं कृत्वा के मन्त्रे स्वरं परिवर्तितवन्तः?

   (A) देवाः (B) असुराः (C) छात्राः (D) ऋत्विजः

   **उत्तर :** (D) ऋत्विजः

4. अस्माभिः किम् अवश्यं पठितव्यम्?

   (A) पुस्तकम् (B) वर्णम् (C) व्याकरणम् (D) बहुविषयान्

   **उत्तर :** (C) व्याकरणम्

5. का पुत्रान् दंष्ट्राभ्याम् नयति?

   (A) व्याघ्री (B) श्वानी (C) मानवी (D) मार्जारी

   **उत्तर:** (A) व्याघ्री

6. केन ब्रह्मलोके महीयते?

   (A) अशुद्धवर्णप्रयोगेण (B) अस्पष्टवर्णप्रयोगेण (C) सम्यग्वर्णप्रयोगेण (D) परिवर्तितवर्णप्रयोगेण

   **उत्तर :** (C) सम्यग्वर्णप्रयोगेण

7. के नाव्यक्ता न च पीडिताः प्रयोक्तव्याः?

   (A) स्वराः (B) वर्णाः (C) पदच्छेदाः (D) कोऽपि न

   **उत्तर :** (B) वर्णाः

8. पठनकाले कीदृशं उच्चारणम् कर्तव्यम्?

   (A) अशुद्धम् (B) अस्पष्टम् (C) स्पष्टम् शुद्धम् च (D) दोषपूर्णम्

   **उत्तर :** (C) स्पष्टम् शुद्धम् च

9. पठने कौशलम् सम्पादयितुम् वयम् कान् वर्धयामः?

   (A) दोषान् (B) रोगान् (C) दुर्गुणान् (D) गुणान्

   **उत्तर :** (D) गुणान्

10. बलवान् इन्द्रः केन वृत्रासुरं मारितवान्?

    (A) खड्गेन (B) बाणेन (C) प्रस्तरेण (D) वज्रेण

    **उत्तर :** (D) वज्रेण

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[15]**

11. गीती शीघ्री __________ तथा लिखितपाठकः। (पीडिताः / शिरःकम्पी)

    **उत्तर :** शिरःकम्पी

12. __________ लयसमर्थं च षडेते पाठका गुणाः। (धैर्यं / पतनभेदाभ्यां)

    **उत्तर :** धैर्यं

13. एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च __________। (पीडिताः / श्वजनो)

    **उत्तर :** पीडिताः

14. स्वजनः __________ माभूत् सकलं शकलं सकृत् शकृत्। (पतनभेदाभ्यां / श्वजनो)

    **उत्तर :** श्वजनो

15. स्वरपरिवर्तनेन __________ परिवर्तितः। ( शब्दम् / अर्थम्)

    **उत्तर :** अर्थम्

16. यः __________ विना पठति सः अधमः पाठकः उच्यते। (अर्थबोधनम् / अनर्थबोधनम्)

    **उत्तर :** अर्थबोधनम्

17. अशुद्ध उच्चारणेन सकलम् __________ भवति। (शकलम् / नकलम्)

    **उत्तर :** शकलम्

18. उत्तमः पाठकः कौशलम् सम्पादयितुम् __________ वर्धयति। (पञ्चगुणान् / षड्गुणान्)

    **उत्तर :** षड्गुणान्

19. देवानाम् असुराणाम् मध्ये सर्वदा __________ भवति। (मित्रभावः / वैरभावः)

    **उत्तर :** वैरभावः

20. यज्ञावसाने __________ बलम् वर्धितम्। (इन्द्रस्य / वृत्रासुरस्य)

    **उत्तर :** इन्द्रस्य

21. वर्णाः स्पष्टतया __________ च उच्चारणीयाः। (अप्राकृतिकरूपेण / स्वाभाविकरूपेण)

    **उत्तर :** स्वाभाविकरूपेण

22. सावधानम् उच्चारणशीलः समाजे __________ प्राप्नोति। (निरादरम् / आदरम्)

    **उत्तर :** आदरम्

23. अव्यक्ताः शब्दस्य अर्थः __________ अस्ति। (स्पष्टाः / अस्पष्टाः)

    **उत्तर :** अस्पष्टाः

24. भीता __________ तद्वद् वर्णान् प्रयोजयेत्। (पतनभेदाभ्यां / धैर्यं)

    **उत्तर :** पतनभेदाभ्यां

25. यज्ञावसाने __________ बली भूत्वा जनान् पीडयिष्यति। (वृत्रासुरः / इन्द्रः)

    **उत्तर :** वृत्रासुरः

*** स्तम्भयोः मेलनं कुरुत।** **[12]**

| खण्ड 'अ' | खण्ड 'ब' |
|---|---|
| 26. प्रयोजयेत् | (क) यः अर्थ न जानाति |
| 27. अनर्थज्ञः | (ख) प्रयोगं कुर्यात् |
| 28. धैर्यम् | (ग) कुक्कुरः शुनकः |
| 29. श्वजनः | (घ) विश्वासः |

**उत्तर :** (1 - ख, 2 - क, 3 - घ, 4 - ग)

| खण्ड 'अ' | खण्ड 'ब' |
|---|---|
| 30. महीयते | (क) शोभनः स्वरः |
| 31. सुस्वरः | (ख) पूज्यते/सम्मानं लभते |
| 32. शीघ्री | (ग) दुर्बल ध्वनिः युक्तः |
| 33. अल्पकण्ठः | (घ) त्वरितम्/वेगेने |

**उत्तर :** (1 - ख, 2 - क, 3 - घ, 4 - ग)

| खण्ड 'अ' | खण्ड 'ब' |
|---|---|
| 34. श्वजनः | (क) सम्पूर्णम् |
| 35. सकलम् | (ख) कुक्कुरः शुनकः |
| 36. अव्यक्ताः | (ग) बाधिताः |
| 37. पीडिताः | (घ) अस्पष्टाः |

**उत्तर :** (1 - ख, 2 - क, 3 - घ, 4 - ग)

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[5]**

38. अधमाः पाठकाः कति भवन्ति?

**उत्तर :** अनर्थज्ञोऽल्पकण्ठश्च

39. किम् अवश्यमेव पठनीयम्?

**उत्तर :** व्याकरणम्

40. पाठकाः केषां सम्यक् प्रयोगं कुर्युः?

**उत्तर :** वर्णनाम्/शब्दानाम्

41. ब्रह्मलोके केन सम्मानं भवति?

**उत्तर :** सम्यक वर्णप्रयोगेण

42. धैर्यं केषां गुणः?

**उत्तर :** पाठकानाम्

*** पूर्णवाक्येन उत्तरं लिखत।** **[32]**

43. वर्णाः कथं प्रयोक्तव्याः?

**उत्तर :** वर्णाः न अव्यक्ता न च पीडिता प्रोक्तव्या।

44. व्याघ्री दंष्ट्राभ्यां कान् नयति?

**उत्तर :** व्याघ्री दंष्ट्राभ्याम् पुत्रान् नयति।

45. 'स्वजनः' 'श्वजनः' च इत्यनयोः अर्थदृष्ट्या कः भेदः?

**उत्तर :** अर्थ्द्रस्ट्या - स्वजनः-स्वस्यजनः, श्वजनः-श्वानस्य जनः इति अनयोः अर्थभेदः भवति।

46. के अधमाः पाठकाः भवन्ति?

**उत्तर :** ये वेगेन पठन्ति, शिरः चालयन् पठन्ति, अर्थम् न जानन्ति दुर्बलध्वनियुक्ताः च, ते एव अधमाः पाठकाः भवन्ति।

47. 'सकलं' 'शकलं' च इत्यनयोः अर्थदृष्ट्या कः भेदः?

**उत्तर :** अर्थदृष्ट्या - सकल-सम्पूर्णम्, शकलम्-विष्ठा च अनयोः अर्थभेदः भवति।

48. उत्तमपाठकस्य गुणान् लिखत।

**उत्तर :** माधुर्यम्, अक्षरव्यक्तिः, पदच्छेदः, सुस्वरः, धैर्यम्, लयसमर्थः च उत्तम-पाठकस्य गुणाः भवन्ति।

49. वृत्रासुरः कः आसीत्? सः कम् जेतुम् यज्ञं कारितवान्?

**उत्तर :** वृत्रासुरः असुराणाम् राजा आसीत्। सः इन्द्रं जेतुम् यज्ञं कारितवान्।

50. अधमः पाठकः कीदृशम् पठति?

**उत्तर :** अधमः पाठकः शीघ्र-शीघ्रम् वेगेन वा, मस्तक दोलनम् कृत्वा, पुनः पुनश्च लिखित्वा, अर्थबोधनम् विना, मन्दस्वरेण च पठति।

51. ऋत्विजः मन्त्रे किमर्थं स्वरं परिवर्तितवन्तः?

**उत्तर :** ऋत्विजः मन्त्रे स्वरं इन्द्रस्य बलं वर्धयितुम् परिवर्तितवन्तः।

52. एकस्य वर्णस्य उच्चारणस्य दोषेण किम् सम्भवति?

**उत्तर :** एकस्य वर्णस्य उच्चारणस्य दोषेण समग्रपदस्य अर्थः परिवर्तते।

53. कः ब्रह्मलोके महीयते?

**उत्तर :** यः वर्णानाम् सम्यक् प्रयोगः करोति सः ब्रह्मलोके महीयते।

54. वर्णोच्चारणं कीदृशं न कर्तव्यम्?

**उत्तर :** वर्णोच्चारणम् अतिकठोररूपेण अतिशैथिल्येन वा न कर्तव्यम्।

55. व्याकरणस्य पठनम् किमर्थम् आवश्यकम् अस्ति?

**उत्तर :** व्याकरणस्य पठनम् आवश्यकम् अस्ति यतः उच्चारणम् दोषपूर्णम् न भवेत्।

56. व्याघ्री स्वशिशुं कीदृशं नयति?

**उत्तर :** व्याघ्री स्वशिशुं दन्तैः तथा न गृह्णाति येन शिशुः क्षतः भवेत्।

57. स्वरपरिवर्तनेन परिणामतः किम् अभवत्?

**उत्तर :** परिणामतः स्वरपरिवर्तनेन इन्द्रस्य बलम् वर्धितम्।

58. पाठकानां षड्-गुणाः के भवन्ति?

**उत्तर :** पाठकानाम् माधुर्यम् अक्षरव्यक्तिः, पदच्छेदः, सुस्वरः धैर्यम् लयसमर्थम् च षड्-गुणाः भवन्ति।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[10]**

59. “यद्यपि बहु न अधीषे तथापि व्याकरणम् पठ।”

**उत्तर :** "यद्यपि बहु न अधीषे तथापि **किम्** पठ?"

60. शिक्षकः इन्द्र वृत्रासुरयोः वैरभाव विषये कथाम् श्रावयति।

**उत्तर :** शिक्षकः कस्मिन् विषये **कथाम्** श्रावयति?

61. छात्राः एकां कथां श्रृण्वन्ति।

**उत्तर :** छात्राः **किम्** कुर्वन्ति?

62. बलवान् इन्द्रः वज्रेण वृत्रासुरम् मारितवान्।

**उत्तर :** बलवान् इन्द्रः **केन** वृत्रासुरम् मारितवान्?

63. “यज्ञावसाने वृत्रासुरो बली भूत्वा जनान् पीडयिष्यति” इति ऋत्विजः विचारयन्ति।

**उत्तर :** "यज्ञावसाने वृत्रासुरो बली भूत्वा जनान् पीडयिष्यति" इति **के** विचारयन्ति?

64. स्वाभाविकरूपेण उच्चारणेन श्रोता वक्तुः भावनाम् सम्यकतया अवगच्छति।

**उत्तर :** स्वाभाविकरूपेण उच्चारणेन श्रोता **कस्य** भावनाम् सम्यकतया अवगच्छति?

65. अव्यक्ताः पीडिता च वर्णाः न प्रयोक्तव्याः।

**उत्तर : कीदृशाः** वर्णाः न प्रयोक्तव्याः?

66. “अक्षरव्यक्तिः” शब्दस्य अर्थः अक्षराणाम् स्फुटतया उच्चारणम् अस्ति।

**उत्तर :** "अक्षरव्यक्तिः" शब्दस्य अर्थम् **किम्** अस्ति?

67. पठनस्य कौशलम् सम्पादयितुम् वयम् पाठकस्य षड्गुणान् वर्धयामः।

**उत्तर :** पठनस्य **किम्** सम्पादयितुम् वयम् पाठकस्य षड्गुणान् वर्धयामः?

68. पतनभेदाभ्याम् भीता व्याघ्री दंष्ट्राभ्याम् पुत्रान् नयति न च पीडयति।

**उत्तर :** पतन-भेदाभ्याम् भीता व्याघ्री **केभ्याम्** पुत्रान् नयति न च पीडयति?

*** अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत।** **[10]**

69. सकृत् - ______________

**उत्तर :** सकृत - एकवारम्।
वाक्य - अशुद्ध उच्चारणेन ‘सकृत्’ शब्दः शकृत् (विष्ठा) भवति।

70. ऋत्विजः - ______________

**उत्तर :** ऋत्विजः - पुरोहिताः।
वाक्य - ऋत्विजः यज्ञं सम्पादयन्ति भवति।

71. महीयते - ______________

**उत्तर :** महीयते - सम्मानित।
वाक्य - उत्तमः पाठकः शुद्ध-उच्चारणेन ब्रह्मलोके महीयते।

72. व्याघ्री - ____________

**उत्तर :** व्याघ्री - बाधिन।
वाक्य - व्याघ्री स्वपुत्रान् स्वदंष्ट्राभ्याम् सुरक्षितम् नयति।

73. माधुर्यम् - ____________

**उत्तर :** माधुर्यम् - मधुरभावः।
वाक्य - स्वर उच्चारणे मधुरं भावम् पाठकस्य उन्नतिकारणं भवति।

74. धैर्यम् - ____________

**उत्तर :** धैर्यम् - धीरज।
वाक्य - धैर्यम् उत्तमपाठकस्य अत्युत्तमः गुणः अस्ति।

75. शीघ्री - ____________

**उत्तर :** शीघ्री - त्वरितम्/वेगेन।
वाक्य - यः शीघ्री पठति, सः अधमः पाठकः उच्यते।

76. शिरःकम्पी - ____________

**उत्तर :** शिरःकम्पी - मस्तक दोलनम्।
वाक्य - शिरःकम्पी च अधमस्य अन्यः गुणः अस्ति।

77. प्रयोजयेत् - ____________

**उत्तर :** प्रयोजयेत् - प्रयोगम् कुर्यात्।
वाक्य - वर्णाणाम् उच्चारणम् न अतिकठोररूपेण प्रयोजयेत्।

78. भीता - ____________

**उत्तर :** भीता - पतन।
वाक्य - भेदाभ्याम् भीता व्याघ्री स्वशिशुं एवमेव गृह्णाति येन शिशुः न पतेत्।

*** अधोलिखित पद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[35]**

79. व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ॥
I. एकपदेन उत्तरत -
(i) व्याघ्री कान् दंष्ट्राभ्याम् नयति?
(ii) व्याघ्रयाः दन्ताः कीदृशाः भवन्ति?
II. पूर्णवाक्येन उत्तरत -
वर्णोच्चारणं कथम् कर्तव्यम्?
III. निर्देशानुसारम् उत्तरत -
(i) पतन भेदाभ्याम् ____________ व्याघ्री पुत्रान् दन्तैः नयति। (उचित शब्द चित्वा रिक्तस्थानं पूरयत )
(अ) दुःखिता (ब) भीता (स) सुखिता (द) हसिता
(ii) सा कम् तथा गृह्णाति येन शिशुः क्षतः न भवेत्?
(अ) शिशुं (ब) पशुम् (स) स्वं (द) सिंहम्

(iii) केषाम् उच्चारणम् अतिकठोररूपेण अतिशैथिल्येन वा न भवेत्?

(अ) शब्दानाम् (ब) वर्णानाम् (स) श्लोकानाम् (द) सर्वेऽपि

**उत्तर :** I. (i) पुत्रान्

(ii) तीक्ष्णाः

II. वर्णोच्चारणम् अतिकठोररूपेण अतिशैथिल्येन वा न कर्तव्यम्।

III. (i) (ब) भीता

(ii) (अ) शिशुं

(iii) (द) सर्वेऽपि

80. माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥

I. एकपदेन उत्तरत -

(i) माधुर्यम् अर्थम् किम्?

(ii) अस्मिन् श्लोके केषां गुणाः वर्णिताः?

II. पूर्णवाक्येन उत्तरत -

पाठकः कानि गुणानि अनुसरति?

III. निर्देशानुसारम् उत्तरत -

(i) पदच्छेदः किमर्थम् कर्तव्यम्?

(अ) समुचितपठनाय (ब) अनुचितपठनाय

(स) अस्पष्टपठनाय (द) कोऽपि न

(ii) अक्षरव्यक्तिः कस्य गुणः भवति?

(अ) उत्तमपाठकस्य (ब) अधमपाठकस्य

(स) दुर्जनस्य (द) स्वजनस्य

(iii) उत्तमानाम् पाठकानाम् कियन्तः गुणाः भवन्ति?

(अ) दश (ब) त्रयः (स) षट् (द) एकम्

**उत्तर :** I. (i) सौम्यत्वम्/प्रियस्वरम्

(ii) पाठकानाम्

II. पाठकः माधुर्यम्, अक्षरव्यक्तिः, पदच्छेदः, सुस्वरः धैर्यम् लयसमर्थम् इत्यादीनि षट् गुणानि अनुसरति।

III. (i) (अ) समुचितपठनाय

(ii) (अ) उत्तमपाठकस्य

(iii) (स) षट्

81. गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥

I. एकपदेन उत्तरत -

(i) 'अनर्थज्ञः' शब्दस्य अर्थ किम्?

(ii) अर्थबोधम् विना कः पठति?

II. पूर्णवाक्येन उत्तरत -

अधमाः पाठकाः कीदृशाः भवन्ति?

III. निर्देशानुसारम् उत्तरत -

(i) यः जनः गीतगानम् इव पठति, किम् उच्यते?

(अ) उत्तम पाठकः (ब) कटु पाठकः (स) लघु पाठकः (द) अधम पाठकः

(ii) ___________ यः पठति सः अधम पाठकः इति उच्यते। (उचितं शब्दं चित्त्वा रिक्त स्थानं पूरयत्।)

(अ) उच्चस्वरेण (ब) कटुस्वरेण (स) मन्दस्वरेण (द) कोऽपि न

(iii) वयम् आदर्श-पाठकाः कथम् भवितुम् शक्नुमः?

(अ) दोषान् गृहीत्वा (ब) गीतगानं इव पठित्वा

(स) अर्थ बोधं विना पठित्वा (द) दोषान् परिष्कृत्य

**उत्तर :** I. (i) अर्थ-बोधं विना

(ii) अनर्थज्ञः

II. ये पठनकाले गीतगानं इव, शीघ्रम-शीघ्रम् मस्तकदोलनं कृत्वा, वारं-वारं लिखित्वा, अर्थबोधं विना, मन्दस्वरेण च पठन्ति ते एव अधमाः पाठकाः भवन्ति।

III. (i) (द) अधम पाठकः

(ii) (स) मन्दस्वरेण

(iii) (द) दोषान् परिष्कृत्य

82. एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥

I. एकपदेन उत्तरत -

(i) काः नाव्यक्ताः प्रोक्तव्याः?

(ii) केन ब्रह्मलोके महीयते?

II. पूर्णवाक्येन उत्तरत -

वर्णानाम् उच्चारणसमये किम् अवधेयम्?

III. निर्देशानुसारम् उत्तरत -

(i) कः समाजे सम्मानं प्राप्नोति?

(अ) अव्यक्त-उच्चारणशीलः (ब) पीडित-उच्चारणशीलः

(स) कटु-उच्चारणशीलः (द) सम्यक्-उच्चारणशीलः

(ii) मानवः सम्यक्वर्ण प्रयोगेन कुत्र महीयते?

(अ) पाताललोके (ब) पृथ्वीलोके (स) ब्रह्मलोके (द) कोऽपि न

(iii) कीदृशाः वर्णाः न प्रोक्तव्याः?

(अ) पीडिताः (ब) अव्यक्ताः (स) अस्पष्टाः (द) सर्वेऽपि

**उत्तर :** I. (i) वर्णाः

(ii) सम्यक् वर्णप्रयोगेण

II. वर्णानाम् उच्चारणसमये इदम् अवधेयम् यत् वर्णाः स्पष्टतया स्वाभाविक-रूपेण च उच्चारणीयाः।

III. (i) (द) सम्यक्-उच्चारणशीलः

(ii) (स) ब्रह्मलोके

(iii) (द) सर्वेऽपि

83. यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत् ॥

I. एकपदेन उत्तरत -

(i) पुत्रेण किम् पठितव्यम्?

(ii) कः बहुविषयान् पठितुम् न पारयति?

II. पूर्णवाक्येन उत्तरत-

अशुद्ध उच्चारणेन किम् भवति?

III. निर्देशानुसारम् उत्तरत-

(i) दोषपूर्ण उच्चारणेन स्वजनस्य परिवर्तनम् किम्?

(अ) दुर्जनस्य (ब) सज्जनस्य (स) सकलस्य (द) श्वजनस्य

(ii) केन उच्चारणेन सकृत् परिवर्तते?

(अ) शकलेन (ब) शुनकेन (स) शकृतेन (द) सर्वेऽपि

(iii) एकस्य वर्णस्य उच्चारणेन कस्य अर्थं परिवर्तितः भवति?

(अ) एकपदस्य (ब) बहुपदानाम् (स) समग्रपदस्य (द) शकलस्य

**उत्तर :** I. (i) व्याकरणम्

(ii) पुत्रः

II. अशुद्ध उच्चारणेन समग्रपदस्य अर्थम् परिवर्तितः भवति।

III. (i) (द) श्वजनस्य

(ii) (स) शकृतेन

(iii) (स) समग्रपदस्य

----- -----